International Journal of Sanskrit Research 2016; 2(5): 04-06

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2016; 2(5): 04-06
© 2016 IJSR
www.anantaajournal.com
Received: 02-07-2016
Accepted: 03-08-2016

**रामकृष्णमिशन्**
विद्यामन्दिरस्य स्नातकतृतीयवर्षीयेण घोषेत्युपाधिकेन पार्थसारथिना।।

**Correspondence**
**रामकृष्णमिशन्**
विद्यामन्दिरस्य स्नातकतृतीयवर्षीयेण घोषेत्युपाधिकेन पार्थसारथिना।।

# शेषार्थविचारः।।

**रामकृष्णमिशन्**

**Abstract**
वैयाकरणततिषु कारकसंख्याविषये अनवद्यं तत्त्वं हि कर्मादीनि कारकाणि षट्। परन्तु सम्यग्व्याकरणपरिशीलितमतिना भर्तृहरिणा प्रतिपाद्यते सप्तमः कारकविशेषः। सोऽयं विशेषः शेषाधिकारे षष्ठ्यर्थ इति नाम्ना हरिणा प्रतिपाद्यते। तच्छरूपो भवति सम्बन्धरूपः। अत एव सम्बन्धस्यापि कारकत्वं अङ्गीकृतं हरिणा। तथा च शेषषष्ठ्याः कारकषष्ठ्याश्च कथं विवेक इत्यस्मिन् प्रबन्धे निरूप्यते।

**Keyword:** कारकप्रातिपदिकार्थः, तद्व्यतिरिकत्वतं, स्वस्वामिभावादिसम्बन्धः, शेषः, तयोः सम्बन्धः इति।

## Introdouction

कर्मादीनां व्यतिरिच्य षष्ठ्यर्थ इति सप्तमकः कारकभेद इति हरिवचनम्। सोऽयं कारकभेदः शेषरूपः शेषरूपसम्बन्धो वेति विविच्यते। कारकं नाम क्रियया सह अन्वयसामर्थ्यं पदम्। इत्यस्यार्थो हि प्रत्यक्षाप्रत्यक्षभावेन यदि क्रियया सह तत्पदस्य केनापि प्रकारेण अन्वयो भवति चेत् तस्मिन् कारकत्वमुपन्नं भवति। यथा "राज्ञः पुरुषः" इत्यस्मिन् स्थले राज्ञः इति पदस्य क्रियया सह प्रत्यक्षयोगाभावात् कारकत्वमुपपन्नं क्रियया सह अन्वयात्।

## Result and Discussion

षष्ठ्यर्थः इति अपरः कारकभेदः इत्यस्मिन् विषये प्रायेषु एव व्याकरणाकरग्रन्थेषु आलोचना विहिता वैयाकरणैः। तद्विषये भगवता पाणिनिना सूत्रमेकं सूत्रितम्। तद्धि "शेषे षष्ठी" इति।

वैयाकरणशिरोमणिभूतकौमुदीकारैरपि सूत्रस्यास्य वृत्तिस्तु एव प्रतिपादिता—" "कारकप्रतिपादिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः तस्मिन् वाच्ये षष्ठी स्यात्"।। इति। वाक्यपदीये अपि ग्रन्थकृता शेषस्वरूपमेवं प्रतिपादितम्—

"सम्बन्धः कारकेभ्यः अन्यः क्रियाकारकपूर्वकः।
श्रुतायामश्रुतायां वा क्रियायां स अभिधीयते"।। इति।[1]

कारकेभ्योऽन्यः कर्मादिविशेषलक्षणेभ्यः षड्भ्यो अन्यो यः सम्बन्धः स शेषः इत्युपयुक्तेतरवचनशेषशब्दाश्रयेण कारकाणामविवक्षा शेषः।।इति।[2]

नागेशविरचिते शेखरे तु एवं प्रतिपादितं शेषस्वरूपं "शेष उक्तादन्यः"।।इति।[3] स च तत्तद्रूपेण स्वत्वादिसम्बन्धत्वेन रूपेण च। कारकविभक्तीनां
क्रियाजनकत्वसमानाधिकरणकर्तृत्वादिशक्तिरूपेण बोधकत्वम्। तत्रापि तन्मूलके सम्बन्धे विवक्षिते षष्ठी इति।[4] (शेखर पृ. 281)

सोऽयं सम्बन्धः श्रुतायामश्रुतायां वा क्रियायां सत्यामेव विशेषणीभूतसम्बन्धिवाचकपदादुत्तरं जायमानया षष्ठ्या अभिधीयते। तत्रोदाहरणमश्रुतायां क्रियायामित्यस्य "राज्ञः पुरुषः" इति। तत्र राजकर्तृकपुरुषसम्प्रदानकदानक्रियानिरूपितं राज्ञि कर्तृत्वम्, पुरुषे च सम्प्रदानत्वमिति क्रियाकारकभावपूर्वको राजपुरुषयोः स्वस्वामिभाववरूपः सम्बन्धः इति पूर्वभाविकारकत्वं तयोरुत्तरावस्थायामप्यनुगतमित्येवं भवति शेषाख्यः सम्बन्धः कारकत्वम्।

श्रुतायां क्रियायामभिधीयते इत्यस्योदाहरणं यथा "मातुः स्मरति", "सर्पिषो जानीते" इत्यादि। अत्र मातुः स्मरति इत्यत्र कर्मत्वविवक्षायां मातरं स्मरणमित्यर्थः। कर्मत्वस्य शेषत्वविवक्षायां तु देवदत्तकर्तृकं मातृसम्बन्धिः स्मरणमित्यर्थः। राज्ञः पुरुषः इत्यादौ तु अश्रुतायां क्रियायां सम्बन्धाभिधानम्। अतः सम्बन्धस्यापि कारकत्वं वाक्यपदीयकृन्मते। सम्बन्धस्य नाम षष्ठ्यर्थस्य। वस्तुतो हि क्रियां विना न जायते कः अपि सम्बन्धः। यथा राज्ञः पुरुषः इत्यस्य विद्यते राज्ञि कर्तृत्वं, पुरुषे च सम्प्रदानत्वं, तत्तु अनुभवसिद्धम्। तत्त्वमिदमुदाहरणेन स्पष्टीकर्तव्यम्। यथा राजा भिक्षुकाय धनं द्रव्यं वा ददाति । अतः अत्र राजनि स्वसत्त्वनिवृत्तिपूर्वकपरसत्त्वोत्पादनक्रियायाः कर्तृत्वं, भिक्षुके च सम्प्रदानत्वमिति गम्यते। अत्र तु क्रियाकारकभावपूर्वको राजभिक्षुकयोः

स्वस्वामिभावादिसम्बन्धः शेषाख्यः षष्ठ्याभिधीयते।
स्वस्वामिभावादिसम्बन्धः शेषाख्यः षष्ठ्याभिधीयते।
स्वस्वामिभावादिसम्बन्धः शेषाख्यः षष्ठ्याभिधीयते।

लोकप्रसिद्धानि कानिचन उदाहरणानि यथा"वृक्षस्य शाखा","देवदत्तस्य अश्वः" इत्यादौ तु वृक्षस्याधिकरणत्वं तथा परस्य तु देवदत्तस्य कर्तृत्वं प्रतीयते। एवञ्च मातुः स्मरति भवगतो नारायणमनुकरोति इत्यादिषु वाक्येषु मात्रादौ कर्मत्वं विद्यते परन्तु तथापि कर्मस्याविवक्षा षष्ठी विधीयते। अत्रेदमवधेयं यत् असतो वस्तुन एव भवति अविवक्षा परन्तु वस्तुनि विद्यमाने सत्यपि कथमविवक्षा स्यादिति? समाधानं प्रदर्श्यते भाष्यकारैः – कथं पुनः सतो नामाविवक्षा? यथा दृश्यते लोके एव केचन प्रयोगाः यथा– "अनुदरा कन्या" तथा "अलोमिकैडिका" इति। अत्र वक्तुराशयो हि एवं अलोमिकेत्युक्ते सत्स्वपि बहुषु लोमसु अत्यन्ताल्पत्वात् लोम्नामसत्कल्पनानि तस्याः। एवमेव विचार्यैव तदभिधानं अलोमिकेति भवति। एवमेव अनुदरा कन्या इत्यत्रापि विद्यमाने अप्युदरे सूक्ष्मत्वात् क्षीणत्वाद्वा तस्या अनुदरेत्यैवमभिधा। पूर्वस्यापि सत्स्वपि लोमसु अल्पत्वात् परस्य च विद्यमानेषु अपि उदरे क्षीणत्वात् अनुदारेति एवम्बिधया अभिधया यथार्थस्य वर्जनं परिलक्ष्यते, परन्तु कृते वर्जने अपि यथार्थे अलोमिकेत्यादिप्रयोगस्तु नासाधुः। उभयात्रापि प्रयुक्तो नञ् तत्तु अल्पार्थे। एवमेव विद्यमानस्य उदरस्य लोम्नो वा प्रयोगे तु तत्सत्ता तिरोभूयते एवं भूयो दृश्यते शास्त्रे अपि यथा विद्यमानमपि कर्म, कर्मणोऽविवक्षायां षष्ठीं प्रयोजयति। कदाचिदसतो अपि विवक्षा भवति । तद्यथा "समुद्रः कुण्डिका", विन्ध्यो वर्धितकम्। कुण्डिका नाम पात्रविशेषः। अत एवात्र कुण्डिकायां समुद्र इति प्रयोगो नोपपन्नः । यतो हि समुद्रस्यातिविशालत्वात् तथा कुण्डिकायाश्च अत्यन्ताल्पायतनत्वात्। तथाहि कुण्डिकायाः अति प्रशस्ततया विशालतया वा तस्यां समुद्र इति व्यवहार उपपद्यते। अत्र तु वर्धितकं नामान्नराशिः तस्य अतिविशालत्वात् विन्ध्यपर्वतसंज्ञा भवति।

सकलवैयाकरणगोष्ठिगदितं तदिदं शेषपदं द्विविधम्।– तत्र शेषपदस्य द्वैविध्यमपि व्याख्याकृतां पक्षद्वयमवाप्यते। तत्र कारकाणामविवक्षैव शेषपदमिति भाष्यकारादिभिः प्रतिपादितं मतम्। तैस्तु एवमुच्यते यत् कर्मादीनां सतामपि कथमविवक्षा सम्भवति? सोऽयं शेषपदार्थः स्वस्वामिभावादिसम्बन्धरूपेण अधीयमाणः षष्ठीविभक्तिं प्रयोजयति। परन्तु इतरेषां नव्यानां मते तु स्वस्वामिभावादिसम्बन्ध एव शेष इति। स च सम्बन्धः कारकप्रातिपदिकार्थव्यतिरिक्तः सन् षष्ठीं प्रयोजयति। अस्तु तावत्—

अत्र आलोचनातः प्राप्यते यत् कोऽपि सम्बन्धे समागते सति सोऽयं सम्बन्धोऽवश्यमेव द्विनिष्ठो भवति, तर्हि आलोच्यमाने अस्मिन् सूत्रे कस्मात् षष्ठी विधेया ?

तथाहि वाक्यपदीये हरिणा व्याहृतं---

" द्विष्ठोऽप्यसौ परार्थत्वात् गुणेषु व्यतिरिच्यते।
तत्राभिधीयमानः सन् प्रधानेऽप्युपभुज्यते"।।इति।5

अत्र वार्तिकोक्तं परं नाम विशेषणम्। यथा राज्ञः पुरुषः इत्यादौ राजपुरुषोर्मध्ये विद्यते स्वस्वामिभावादिसम्बन्धः। तत्र पदयोः राजपुरुषयोर्वा षष्ठी विधीयते राजन् इति शब्दात् परन्तु कथन्न पुरुषशब्दात् इतीयमाकाङ्क्षा तु स्वाभाविकी आयाति। अतोऽत्र मञ्जुषायां प्रतिपादितं – द्विष्ठो यद्यपि सम्बन्धः षष्ठ्युत्पत्तिस्तु भेदकात्। अत्र भेदको नाम विशेषणम्। अतः सम्बन्धे सति वाक्ये तत्र विधीयमानत्वात्

विशेषणादेव न तु विशेष्यपदात्। विशेष्यपदात्तु प्रथमैव वाच्या। यद्यत्र युगपदेवोभाभ्यांविशेषणविशेष्याभ्यां षष्ठी समुत्पद्यते तदा तत्रापि उभयसम्बन्धिभ्यां षष्ठीद्वये सम्बन्धद्वयमायाति। परन्तु तन्न युक्तम्। अतो वाक्ये षष्ठी एकैव भवति सा च विशेषणात् उत्पद्यमाना अपि तु सा च षष्ठी सम्बन्धस्य वाचिकापि।

केचन वैयाकरणा उपदिशन्ति यत्तत्र परार्थो हि शेषपदस्यार्थः। परार्थो नाम विशेषणार्थः। अतो "राज्ञः पुरुष" इत्यस्मिन् उदाहरणे विशेषणस्य परार्थत्वादेव तत्र राज्ञः इत्यस्मिन् पदे शेषभावः प्रतीयते अतस्ततो षष्ठी विधीयते।

परन्तु द्वावपि यदा विशेषणभूतौ भवतस्तदा तु द्वाभ्यामेव षष्ठी विधीयते एव। यथा राज्ञः पुरुषस्य गृहम् इत्यादिस्थले प्रतीयमानः स्वस्वामिभावादिसम्बन्ध एव तत्र पुरुषः इतीदं पदं जातिव्यक्तिसंख्यादिप्रातिपदिकार्थैरुक्तत्वात् तत्र प्रातिपदिकार्थमात्रे प्रथमैव वाच्या। तत्र पुरुषे प्रतीयमानः प्रातिपदिकस्यार्थो हि अन्तरङ्गः, तत्र भासमानं विशेष्यत्वं राजसन्निधानेन गम्यमानत्वात् तत्तु बहिरङ्गम्। अतः पुरुषपदे प्रथमैव वाच्या। परन्तु राजनि सम्बन्धरूपं यदाधिक्यं तत्तु पुरुषसंसर्गमन्तरेणापि गम्यते। अस्तु उदाहरणेनेतरेषां विचारणीयं – यथा राज्ञः पुरुषस्य गौरित्यादिप्रयोगे एकस्मिन्नेव पुरुषपदे धर्मद्वयं राजते। तत्र राज्ञः पुरुषः इति पदद्वयमाश्रित्य पुरुषस्य राज्ञान्वितत्वात् तत्र राजनिरूपितं पुरुषपदस्य प्राधान्यमाचक्षितम्, परन्तु तस्यैव पुरुषस्य पदस्य गोनिरूपितमप्राधान्यं दृश्यते।

यथा स्वपुत्रेण सहागतः पिता इत्यस्मिन् लौकिके वाक्ये सहयोगे पुत्रशब्दे विहिता तृतीया ।

अत्र प्रस्तुते अस्मिन् वाक्ये पितुरेव प्राधान्यमागमनक्रियां प्रति, पुत्रशब्दस्तु अप्राधान्यं परन्तु सहेति अव्ययपदेन पुत्रशब्दस्य समासविधानत्वादत्र पुत्रशब्दस्य प्राधान्यम्।

सूत्रे शेष इति कथम्? यथान्यत्र उपलभ्यमानेषु कारकेषु कर्मणि द्वितीयेति द्वितीयैव, कर्तृकरणयोस्तृतीयेति तृतीयैवेति एवमत्रापि प्रतिपाद्यते शेषत्वविवक्षायां षष्ठ्यैव कर्मादिषु अर्थेषु शेषार्थः, अयं न प्रयुज्यते इति नियमबोधनायैव सूत्रेऽत्यावश्यकं शेषपदस्य। इदानीं विचारणीयं यत् – कर्मत्वकरणत्वादिविवक्षामनपेक्ष्य सर्वत्रैव सम्बन्धसामान्ये षष्ठी शेषे षष्ठी इति सूत्रेणैव विधीयते तर्हि कथं पुनः "ज्ञोऽविदर्थस्य करणे" इत्याद्यष्टसूत्रैः शेषत्वविवक्षा विहिता। अत्रोच्यते—तन्निबन्धनं तु समासनिवृत्यर्थम्। "सर्पिषो ज्ञानम्" तथा "मातुः स्मरण"मित्यादिस्थले समासनिवृत्तये एव सूत्राष्टकाणामवतारणम्। अत्र तु इष्टसिद्धये समासनिवृत्तिरेव तेषां फलमित्येवमेव चिन्तनं समीचीनम्। परन्तु केवलं विभक्तिलोपः समासनिवृत्तिश्च फलमिति तु अप्रामाणिकं, तदर्थमेव वार्तिककारवार्तिकेण प्रतिपादितं –"प्रतिपदविधिना षष्ठी न समस्यते"।6 इति।

तत्रोक्तेषु सूत्राष्टकेषु येषां प्रतिपदानामुल्लिख्य षष्ठीविधानं विहितं तच्छष्ठीविभक्त्यन्तपदेन समासः कार्यः एवमेव वैयाकरणवचनम्। सम्यग्विचिन्त्य हरिणापि समुदीरितं --- "कारकैर्व्यपदिष्टे च श्रुयमाणक्रिये पुनः।
प्रोक्ता प्रतिपदं षष्ठी-समासस्य निवृत्तये"।।इति।

## Conclution

अर्थात् साधनैः कर्मकारकादिभिः सामानाधिकरण्येन व्यपदिष्टे च कर्मणि शेषे इत्यादिरूपैर्व्यवहृते तु श्रुयमाणे क्रिये शेषाख्ये सम्बन्धे "शेषे षष्ठी" इत्येवंसिद्धायांषष्ठ्यांमातुःस्मरतिइत्यादौ "अधिगर्थदयेशां कर्मणि" इत्यादौअधिगर्थदयेशांकर्मणिइत्यादिभिःप्रतिपदंविधीयमानाषष्ठी "मातुः स्मृतम्" इत्यादौसमासस्यनिवृत्तयेएवप्रोक्ता।

तदेवंशेषत्वविवक्षायां "सर्पिषो ज्ञानम्" "मातुः स्मरण" मित्यादीनिसमासरहितानिपदान्येवसाधूनि।परन्तुशेषत्वेऽविवक्षिते हरिस्मरणम् इत्यादौ "कर्तृकर्मणोःकृति " (2/3/65.) इतिसूत्रेणकृद्योगेकर्मणिषष्ठी, अपिचतद्विभक्त्यन्तेनसमासेनेष्टसिद्धिर्भवति।शेषषष्ठ्यांसमासनिषेधेऽपि सर्वत्र कारकषष्ठ्यां सिद्ध एव समासः तर्हि किं प्रयोजनं समासनिषेधस्येति? तदुच्यते— "कर्तृकर्मणोः कृति" इति सूत्रेण षष्ठ्यामुत्पन्नायां षष्ठीति सूत्रेण (2/2/8) समासे "गतिकारकोपपदात् कृत्"

इतिसूत्रेणमध्योदात्तत्वं भवति, शेषषष्ठ्याःसमासे तु अन्तोदात्तत्वं स्यात्।अयमेवकारकषष्ठ्याःशेषषष्ठ्याश्चोभयोर्भेदः इतिव्याकरणविधिरितिदिक्।

## Reference

1. सम्पादक- त्रिपाठीहरिश्चन्द्र मानी भर्तृहरि, वाक्यपदीय-तृतीयकाण्ड-द्वितीयविभागः स्थान- सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी दिनाङ्कः-१९९७,
2. सम्पादक- शर्मा एम् एम् पण्डित शिवदत्त पतञ्जलि-- महाभष्यम्- द्वितीयभागः स्थान- चौखाम्बा संस्कृत प्रकाशनी
3. भट्ट-नागेश, लघुशब्देन्दुशेखरः, सम्पादक- शर्मा डा. तेजपाल स्थान- सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी दिनाङ्कः-२००२
4. त्रिपाठीहरिश्चन्द्र मानी भर्तृहरि, वाक्यपदीय-तृतीयकाण्ड-द्वितीयविभागः स्थान- सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी दिनाङ्कः-१९९७
5. .त्रिपाठीहरिश्चन्द्र मानी भर्तृहरि, वाक्यपदीय-तृतीयकाण्ड-द्वितीयविभागः स्थान- सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी दिनाङ्कः-१९९७

6. वैयाकरणसिद्धान्तकौमुदी सम्पादक- श्री-अयोध्यनाथसान्यालशास्त्री स्थान-संस्कृतपुस्तकभाण्डार,३२विधानसरणी कोलकाता-७00000६
7. त्रिपाठीहरिश्चन्द्र मानी भर्तृहरि, वाक्यपदीय-तृतीयकाण्ड-द्वितीयविभागः स्थान-सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी दिनाङ्कः-१९९७
8. वाक्यपदीयम्, पृष्ठा-३९७
9. महाभाष्यम्, सूत्रसंख्या-२•३•५०
10. लघुशब्देन्दुशेखरः, पृष्ठा—२८१
11. लघुशब्देन्दुशेखरः, पृष्ठा—२८१
12. वाक्यपदीयम्, पृष्ठा-३९७
13. सिद्धान्तकौमुदी।
14. वाक्यपदीयम्, पृष्ठा-४०७